# श्रीपद्मनाभस्तोत्रम्

Shri Padmanabhastotram

sanskritdocuments.org

November 10, 2018

# Shri Padmanabhastotram

# श्रीपद्मनाभस्तोत्रम्

## Sanskrit Document Information

Text title : padmanAbhastotram

File name : padmanAbhastotram.itx

Category : vishhnu, sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Location : doc_vishhnu

Author : sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 10, 2018

*sanskritdocuments.org*

# श्रीपद्मनाभस्तोत्रम्

(श्रीमदनन्तपद्मनाभक्षेत्रे)

पद्मनाभ करुणामृतराशे सद्महेतुलवशून्यकृपायाः ।
छद्महारितमहाबलिसम्पद्विद्म एव तव वीर्यमनन्तम् ॥ १॥

नाभ्याः सरस्त्वेन हि वर्णनं तु सत्यं तदा स्यात्किल पद्मनाभ ।
यदा त्वदीयं विषयीकरोति नाभिं न चेद्याति कथं प्रमात्वम् ॥ २॥

नाभीपद्मे पुत्रं वक्षसि कान्तां च सन्दधत्तान्तः ।
स्वपिषि सदा किं विष्णो नम्रायास्मै द्रुतं ब्रूहि ॥ ३॥

पापाब्धौ बडवानलस्य हि शिखा जाड्यान्धकारे रविः
भाग्याब्धौ शरदिन्दुपङ्क्तिरमला त्वन्नामसङ्कीर्तनम् ।
भक्तानां परिपोषणे च जननी स्वात्मावबोधे पिता
कस्तस्माद्विमुखो भवेद्भुवि नरो नो चेन्महापापभाक् ॥

क्षीराम्भोनिधिराजमानफणिराण्मध्ये शयाना सदा
लक्ष्मीपाणिपयोजमर्दितपदा कारुण्यवारान्निधिः ।
कुर्वाणा मधुना च कैटभयुजा युद्धं च दोर्भ्यां मुहु-
र्मुद्रा काचन मुक्तिदानकुशला निद्राति जागर्ति वा ॥

पद्मनाभ तव पादसरोजासक्तचित्तमवनीपतिमेनम् ।
पाहि साश्रितसबन्धुसविद्वल्लोकमादरभरेण सराष्ट्रम् ॥ ६॥

सामोदं प्रदिशन्तु वञ्चिकुलभूमूलर्क्षराजाय वाग्-
देवीचन्द्रकलाधरेभवदनाः कारुण्यवाराशयः ।
दीर्घायुर्दृढगात्रतामलयशांस्याचन्द्रतिग्मांशुभं
धर्माध्वन्यधिकां प्रवृत्तिमचलामच्छिन्नसत्सन्ततिम् ॥ ७॥

पायासुर्जगदम्बकेन्दुविलसच्छीर्षेभवक्त्राः सदा
राज्ञौ केरलदेशभाग्यलतिके कारुण्ययुग्भिर्मुदा ।

दृग्भिः पादविनम्रसौख्यविततेः सम्पादिकाभिर्जवाद्-
दत्त्वा सन्ततिमाशु सद्गुणयुतामारोग्यदीर्घायुषी ॥ ८॥

मोचितः किं गजाधीश पद्मनाभेन सत्वरम् ।
दृढभावनया तस्य पद्मनाभोऽभवद्व्रजेट् ॥ ९॥

श्रीभूमिपाणिसरसीरुहसेविताङ्घ्रे
श्रीवत्सकौस्तुभधर प्रणतार्तिहारिन् ।
श्रीकण्ठमित्र दिननाथसुधांशुनेत्र
श्रीपद्मनाभ मम देहि पदावलम्बम् ॥ १०॥

नागेन्द्रभोगशयन प्रणतालिवाञ्छा-
सम्पूरणामरतरो विधियोनिनाभे ।
नाकाधिपादिपरिपूजितपादपद्म
श्रीपद्मनाभ मम देहि करावलम्बम् ॥ ११॥

कमलाकरपद्मपूजितं करुणादुग्धपयोधिमध्यगम् ।
भुजगाधिपभोगशायिनं कलये कञ्चन देवसत्तमम् ॥ १२॥

इति श्रीशृङ्गेरी जगद्गुरु श्रीसदाशिवाभिनवनृसिंहभारती-
श्रीपादैः विरचितं श्रीपद्मनाभस्तोत्रं सम्पूर्णम् ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

---

*Shri Padmanabhastotram*

pdf was typeset on November 10, 2018

Please send corrections to *sanskrit@cheerful.com*